# Ekadanta Stuti Naradamunikrita

# નારદમુનિકૃતા એકદન્તસ્તુતિઃ

## Document Information

Text title : Ekadanta Stuti Naradamunikrita

File name : ekadantastutiHnAradamunikRRitA1.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM dvitIyaH khaNDaH | adhyAyaH 3 | 2.3 40-57||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# નારદમુનિકૃતા એકદન્તસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
નારદ ઉવાચ ।
નમામિ ગણનાથં તં સર્વવિઘ્નવિનાશિનમ્ ।
વેદાન્તાગોચરં તજ્જ્ઞૈર્ગમ્યં બ્રહ્મૈવ સંસ્થિતમ્ ॥ ૪૦॥
મનોવાણીવિહીનં નો મનોવાણીમયં ન ચ ।
બ્રહ્મેશાનં કથં સ્તૌમિ સિદ્ધિબુદ્ધિપતિં પરમ્ ॥ ૪૧॥
ત્વદ્દર્શનેન હેરમ્બ કૃતકૃત્યોઽહમઞ્જસા ।
ઇત્યુક્ત્વા પૂજયામાસ ભક્તિભાવસમન્વિતઃ ॥ ૪૨॥
પૂજયિત્વા ગણેશાનં પુનસ્તુષ્ટાવ નારદઃ ।
રોમાઞ્ચિતશરીરોઽસૌ ભાવયુક્તો મહામુનિઃ ॥ ૪૩॥
નમો નમો ગણેશાય વિઘ્નરાજાય તે નમઃ ।
ભક્તાનાં વિઘ્નહન્ત્રે ચાભક્તાનાં વિઘ્નકારિણે ॥ ૪૪॥
અમેયમાયયા ચૈવ સંયુક્તાય નમો નમઃ ।
યોગરૂપાય વૈ તુભ્યં યોગિભ્યો મોહદાય તે ॥ ૪૫॥
વિનાયકાય સર્વેશ નમશ્ચિન્તામણે નમઃ ।
અનન્તમહિમાધાર નમસ્તે ચન્દ્રમૌલયે ॥ ૪૬॥
એકદન્તાય દેવાય માયિભ્યો મોહદાય તે ।
નમો નમઃ પરેશાય પરાત્પરતમાય તે ॥ ૪૭॥
નિર્ગુણાય નમસ્તુભ્યં ગુણાકારાય સાક્ષિણે ।
મહાખુવાહનાયૈવ મૂષકધ્વજધારિણે ॥ ૪૮॥
અનાદયે નમસ્તુભ્યં જ્યેષ્ઠરાજાય ઢુણ્ઢયે ।
હર્ત્રે કર્ત્રે સદા પાત્રે નાનાભેદમયાય ચ ॥ ૪૯॥
ત્વદ્દર્શનસુધાપાનાદ્ધતં મે ભ્રાન્તિજં મહત્ ।
મરણં ભિન્નભાવાખ્યં ગણેશોઽહં કૃતસ્ત્વયા ॥ ૫૦॥
ન ભિન્નં પરિપશ્યામિ ત્વદૃતે ગણનાયક ।

શાન્તિદં યોગમાસાદ્ય પ્રસાદાત્તે ન સંશયઃ ॥ ૫૧॥
ભક્તિં દેહિ ગણાધીશ પરાં ત્વત્પાદપદ્મયોઃ ।
કુરુ માં ગાણપત્યં ત્વં પ્રેમયુક્તં ચ તે પદિ ॥ ૫૨॥
ઇત્યુક્ત્વા વિરરામાથ તં પુનર્ગણપોઽવદત્ ।
મદીયા ભક્તિરત્યન્તં ભવિષ્યતિ સદાઽચલા ॥ ૫૩॥
(ફલશ્રુતિઃ)
એકદન્ત ઉવાચ ।
ન યોગાચ્ચલનં ક્વાપિ ભવિષ્યતિ મહામુને ।
સદા યોગીન્દ્રપૂજ્યસ્ત્વં સર્વમાન્યો ભવિષ્યસિ ॥ ૫૪॥
ત્વયા કૃતમિદં સ્તોત્રં શાન્તિયોગપ્રદં ભવેત્ ।
પઠતે શ‍ૃણ્વતે ચૈવ ભુક્તિમુક્તિપ્રદાયકમ્ ॥ ૫૫॥
ઇત્યુક્ત્વા તસ્ય હૃદયે યયૌ લીનો ગજાનનઃ ।
સદા હૃદિ ગણેશાનં પશ્યતિ સ્મ મુનિઃ સ્વયમ્ ॥ ૫૬॥
ઇત્યાખ્યાનં નારદીયં કથિતં તે પ્રજાપતે ।
શ‍ૃણુયાદ્યઃ પઠેદ્વા યઃ સોઽપિ સદ્ગતિમાપ્નુયાત્ ॥ ૫૭॥

ઇતિ નારદમુનિકૃતા એકદન્તસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં દ્વિતીયઃ ખણ્ડઃ । અધ્યાયઃ ૩ । ૨.૩ ૪૦-૫૭॥

- .. mudgalapurANaM dvitIyaH khaNDaH . adhyAyaH 3 . 2.3 40-57..

Proofread by Yash Khasbage, Preeti Bhandare

*Ekadanta Stuti Naradamunikrita*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*